# Siddhantasara Upanishad

# સિદ્ધાન્તસારોપનિષત્

## Document Information

Text title : siddhAntasAropaniShat

File name : siddhAntasAropaniShat.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# સિદ્ધાન્તસારોપનિષત્

ભદ્રં કર્ણેભિઃ-ઇતિ શાન્તિઃ

## પ્રથમાવરણમ્ ।

અથ ભારદ્વાજઃ કુમારં પપ્રચ્છ । ભગવન્ મે બ્રૂહિ
પરમતત્ત્વકૈલાસરહસ્યમ્ । તદ્ગુહ્યમુવાચ સ્કન્દઃ ।
સાધુ પૃષ્ટં સર્વં નિવેદયામિ યથાજ્ઞાતં મયા ।
હે ભારદ્વાજ શ‍ૃણુ વાક્યમેતત્ । પરમકૈવલ્યઃ સ એવ કૈલાસઃ ।
ઈશ્વરકૃપયા પરમપરિપક્વચિત્તા જાનન્તિ । નાન્યે જાનન્તિ
ગુહ્યમિદમનિર્વાચ્યમમિતબોધસાગરમમિતાનન્દસમુદ્રમખણ્ડાનન્દ-
રૂપન્નિરવયવં નિરાધારં નિર્વિકારં નિરઞ્જનમનન્તં
બ્રહ્માનન્દસમષ્ટિકન્દં તૈરાનન્દપુરુષૈશ્ચિદ્રૂપૈરધિષ્ઠિતં
બ્રહ્માનન્દમયાનન્તનિરતિશયાનન્દસાગરાકારમાત્મસમાનાનન્દ-
વિભૂતિપુરુષાનન્તાનન્દમણ્ડિતં નિત્યમઙ્ગલમનન્તવિભવમ્ ।
બ્રહ્માનન્દમયાનન્તપ્રાકારપ્રાસાદતોરણવિમાનોપવનાવલીભિર્જ્વલ-
ચ્છિખરૈરુપલક્ષિતો
નિરુપમનિત્યનિરવદ્યનિરતિશયનિરવધિકબ્રહ્માનન્દાચલો
વિરાજતે । તદુપરિ જ્વલતિ નિરતિશયાનન્દદિવ્યતેજોરાશિઃ ।
તદભ્યન્તરસંસ્થાને શુદ્ધબોધાનન્દલક્ષણં વિભાતિ ।
તદન્તરાલે ચિન્મયવેદિકાઽઽનન્દવેદિકાઽઽનન્દવનવિભૂષિતા ।
તત્ર વેદકલ્પતરુવનં યજ્ઞકલ્પતરુવનં યોગકલ્પતરુવનમ્ ।
તદભ્યન્તરે અમિતતેજોરાશિસ્વાત્મજ્યોતિર્જ્વલતિ ।
તત્ર પરમમઙ્ગલાસનં વિરાજતે । તસ્યોપરિ
સમાસીનાનન્તપરિપાલકનન્દ્યાદિગણપાઃ સન્તિ । અનન્તોત્કટજલદમણ્ડલં
નિરતિશયદિવ્યતેજોમણ્ડલવૃન્દાકારપરમાનન્દશુદ્ધ-
બોધસ્વરૂપમનન્તાનન્દસૌદામિનીપરમવિલાસં

નિરતિશયાનન્તપરમાનન્દપારાવારજાલમ્ ॥

ઇતિ પ્રથમાવરણમ્ ।

## દ્વિતીયાવરણમ્ ।

તન્મધ્યે કલ્યાણાચલો વિભાતિ ।
અનન્તાનન્દપર્વતશિખરૈરભિવ્યાપ્તમનન્તબોધાનન્દવ્યૂહૈરભિતસ્તતં
બ્રહ્મવિદ્યાપ્રવાહૈરાનન્દરસનિર્ભરૈઃ
ક્રીડાનન્દપર્વતૈરનન્તૈરભિવ્યાપ્તં
બ્રહ્મવિદ્યામયૈરનન્તપ્રાકારૈરાનન્દામૃતમયૈર્દિવ્યગન્ધૈઃ
સ્વભાવરશ્મિમયૈરનન્તબ્રહ્મવનૈરતિશોભિતમપરબ્રહ્મવિદ્યા-
સામ્રાજ્યાધિદૈવતમનન્તમોક્ષસામ્રાજ્યાદ્વિતીયમેકં
પરમકલ્યાણમનન્તવિભવમમિતબોધાનન્દાચલોપરિસ્થિતં
શુદ્ધબોધમયાનન્તપ્રાસાદૈઃ
સંવૃતમાનન્દમયાનન્તવિમાનાવલીભિર્વિરાજિતમત્યાશ્ચર્યાનન્ત-
વિભૂતિસમમનન્તશુદ્ધાનન્દપરિઘૈઃ
સમાવૃતમનન્તદિવ્યતેજોજ્વાલાજાલૈરભિતોઽનિશં
પ્રજ્વલ્યન્તમત્યાશ્ચર્યાનન્તવિભૂતિસમષ્ટ્યાકારમાનન્દ-
રસપ્રવાહૈરલઙ્કૃતમમિતવિજ્ઞાનતરઙ્ગિણ્યાઃ પ્રવાહૈરતિમઙ્ગલં
બ્રહ્મતેજોવિશેષાકારૈરનન્તબ્રહ્મવનૈરભિતસ્તતં
બ્રહ્મવિદ્યાકલ્પતરુવનૈઃ સુશોભિતં બોધકલ્પતરુવનૈઃ
પરિવેષ્ટિતમનન્તનિત્યમુક્તૈરભિવ્યાપ્તં
તદભ્યન્તરેઽનન્તદિવ્યમઙ્ગલાસનં વિરાજતે । તદુપરિ
નિત્યજ્ઞાનાનન્દરૂપા અદ્વૈતશિવપૂજકાસ્તિષ્ઠન્તિ ॥

ઇતિ દ્વિતીયાવરણમ્ ।

## તૃતીયાવરણમ્ ।

તન્મધ્યે ચિદાનન્દાચલો વિભાતિ । તદુપરિ બ્રહ્મતેજોમયાનન્તશિખરાઃ
સન્તિ । તત્ર બ્રહ્મવિદ્યામયાનન્તપરિઘાઃ સન્તિ ।
વાચામગોચરાનન્તચિન્મયાનન્દવનૈઃ પરિવેષ્ટિતં
બ્રહ્મકલ્પતરુવનૈઃ સમાવૃતં અમુતકલ્પતરુવનૈરુપશોભિતં

બ્રહ્મતેજોમયાનાન્દરસપ્રવાહૈરતિશોભિતં બ્રહ્મવિદ્યાતરઙ્ગિણ્યાઃ પ્રવાહૈઃ સુમઙ્ગલં નિરતિશયાનન્તદિવ્યાનન્દતેજોજ્વાલારાશિમણ્ડલં જ્વલતિ । પરમાનન્દમયાનન્તવિમાનાવલિભિઃ સઙ્કુલમનન્તચિન્મયપ્રાસાદજાલસઙ્કુલમનન્તબ્રહ્માનન્દાનુભવ-પતાકાધ્વજતોરણૈરલઙ્કૃતમનન્તનિત્યમુક્તૈરભિવ્યાપ્તં તદભ્યન્તરસંસ્થાનેઽનન્તચિન્મયાસનં વિરાજતે । તસ્યોપરિ નિત્યશુઽદ્ધબુદ્ધમુક્તશિવૈક્યભક્તાસ્તિષ્ઠન્તિ ॥

ઇતિ તૃતીયાવરણમ્ ।

## ચતુર્થાવરણમ્ ।

તન્મધ્યેઽમિતબોધાનન્દાચલો વિભાતિ । તદુપરિ પરમકૈવલ્યાનન્દરૂપાનન્તશિખરાઃ સન્તિ । તત્ર પરમાનન્દામુતમયૈર્દિવ્યાનન્તપ્રાકારો જ્વલતિ । દિવ્યગન્ધૈઃ સ્વભાવચિન્મયૈરનન્તબ્રહ્મવનૈરતિશોભિતમાનન્દકલ્પતરુવ-નૈરાવૃતં મુક્તિકલ્પતરુવનૈઃ સુશોભિતં પારાવારાનન્દરસનિર્ભરૈરતિશોભિતં સ્વાત્માનન્દાનુભવતરઙ્ગિણ્યાઃ પ્રવાહૈરતિમઙ્ગલં પરમકલ્યાણમનન્તવિભવમમિતતેજોરાશ્યાકારમનન્તબ્રહ્મતેજોરાશિ-સમષ્ટ્યાકારમનન્તદિવ્યતેજોજ્વાલાજાલૈરભિતોઽનિશં પ્રજ્વલિતમનન્તદિવ્યાપારબ્રહ્મવિદ્યાસામ્રાજ્યાધિદૈવતમમોઘ-નિજમન્દકટાક્ષચિદાનન્દમયાનેકપ્રાસાદવિશેષૈઃ પરિવેષ્ટિતં બ્રહ્મવિદ્યામયૈરનન્તપ્રકારાનન્દામૃતદિવ્યમઙ્ગલવિમાનૈઃ સુશોભિતં ચિદ્રૂપવિલાસનિભચિન્મયાસનં વિરાજતે । અધિતિષ્ઠન્તિ તિજોરાશિં તદન્તર્ગતદિવ્યતેજોવિશેપમખિલપવિત્રાણાં પરમં પવિત્રં ચિદ્રૂપપરાનન્તનિત્યમુક્તૈભિવ્યાપ્તં સચ્ચિદાનન્દરૂપાઃ શિવાત્મૈક્યોપાસકાઃ ॥

ઇતિ ચતુર્થાવરણમ્ ।

## પઞ્ચમાવરણમ્ ।

અનન્તાનન્દપર્વતૈઃ પરમકૌતુકમાભાતિ । તદુપરિ
જ્વલતિ નિરતિશયાનન્દદિવ્યતેજોરાશિમણ્ડલમ્ ।
ચિદાનન્દમયાનન્તપ્રાકારવિશેષૈઃ
પરિવેષ્ટિતમ્ । તચ્ચ પરમકલ્યાણવિલાસવિશેષમ્ ।
તદખણ્ડદિવ્યતેજોમણ્ડલાકારં પરમાનન્દસૌદામિનીચયોજ્જ્વલમ્ ।
તચ્ચામિતપરમતેજઃપરમવિહારસંસ્થાનવિશેષં
પરમતેજોમણ્ડલવિશેષં પરમાનન્દામૃતબ્રહ્મવિદ્યામયાનન્તસમુદ્રં
ચિદાનન્દતરઙ્ગાકારમ્ । તન્મધ્યે
અનન્તદિવ્યતેજઃપર્વતસમષ્ટ્યાકારમપરિચ્છિન્નાનન્તશુદ્ધબોધાનન્દમણ્ડલં
વાચામગોચરાનન્દબ્રહ્મતેજોરાશ્યાકારમનન્તશિખરોજ્જ્વલમખણ્ડ-
તેજોમણ્ડલવિશેષં નિત્યાનન્દમૂર્તિમદ્ભિઃ પરમમઙ્ગલૈઃ
પરિધીકૃતમપરિછિન્નાનન્દસાગરાકારં
બ્રહ્માનન્દરસક્રીડાવનૈઃ સુશોભિતમનન્તસહસ્રાનન્દપ્રાકારૈઃ
સમુજ્જ્વલિતં મુક્તિકલ્પતરુવનૈઃ પરિવેષ્ટિતં
વિભૂતિકલ્પતરુવનૈરભિતસ્તમનન્તાનન્દ-
વિમાનજાલસુંલમનન્તબોધસૌધવિશે-
ષૈરભિતોઽનિશં પ્રજ્વલિતં ક્રીડાનન્તમણ્ડપવિશેષૈર્વિશેષિતં
બોધાનન્દમયાનન્તપરમછત્રધ્વજચામરવિતાનતોરણૈરલઙ્કૃતં
શુદ્ધાનન્દવિશેષસમષ્ટિમણ્ડલવિશેષાનન્તપ્રાસાદોન્નતોજ્જ્વલમખણ્ડ-
ચિદ્ઘનાનન્દવિશેષં પરમાનન્દવ્યૂહૈર્નિત્યમુક્તૈરભિતસ્તતમનન્ત-
દિવ્યતેજઃપર્વતસમષ્ટ્યાકારપરિચ્છિન્નાનન્તશુદ્ધબોધાનન્દમણ્ડલં
પરમાનન્દલહરીવનશોભિતમસઙ્ખ્યાકાનન્દસમુદ્રમનન્તજ્વાલા-
જાલૈરલઙ્કૃતં ચિદાનન્દતરઙ્ગિણ્યાઃ પ્રવાહૈરતિમઙ્ગલં
સ્વાત્માનન્દાનુભવામૃતકલ્લોલરસપ્રવાહૈરલઙ્કૃતં
સ્વપ્રકાશાનન્તાનન્દતેજોજ્વાલાજાલૈરાવૃરતમ્ । તદભ્યન્તરે
ચિન્મયાનન્દાસનમુજ્જ્વલમ્ । તદુપરિ વિભાત્યખણ્ડાનન્દતેજોમણ્ડલમ્ ।
તદભ્યન્તરસમાસીનાઃ આનન્દસાગરનિત્યતૃપ્તાઃ શિવાદ્વૈતોપાસકાઃ
સ્વાત્મલિઙ્ગાર્ચકાસ્તિષ્ઠન્તિ । નિરતિશયદિવ્યતેજોમણ્ડલાકારા
આનન્દઘનસાગરાઃ પરમકૈવલ્યસ્વરૂપાનન્તગણાઃ પરિસેવન્તે ॥

ઇતિ પઞ્ચમાવરણમ્ ।

## ષષ્ઠાવરણમ્ ।

પરમચિદ્વિલાસસમષ્ટ્યાકારં નિર્મલં નિરવદ્યં
નિરાશ્રયમતિનિર્મલાનન્તકોટિરવિપ્રકાશૈકોજ્જ્વલમનન્તોપનિષદર્થ-
સ્વરૂપમખિલપ્રમાણાતીતં
મનોવાચામગોચરં નિત્યમુક્તસ્વરૂપં કૈવલ્યાનન્દરૂપં
પરમાનન્દલક્ષણાપરિચ્છિન્નાનન્તજ્યોતિઃ શાશ્વતં શશ્વદ્વિભાતિ ।
તદભ્યન્તરસંસ્થાનેઽમિતાનન્દચિદ્રૂપાચલમખણ્ડપરમાનન્દવિશેષં
બોધાનન્દમહોજ્જ્વલમનન્તચિત્સાગરકલ્લોલજાલશિખરાકારં
નિત્યમઙ્ગલમન્દિરમનન્તાનન્દબોધસૌધવિશેષૈરભિતોઽનિશં
પ્રજ્વલિતં ચિદાનન્દાનન્તચિત્સગરૈઃ પરિધીકૃતં
બ્રહ્મસાક્ષાત્કારાનુભવવિશેષબોધસારતરાનન્તપ્રાકારૈઃ
સમુજ્જ્વલિતમનન્તસહસ્રકૈવલ્યાનન્દવનોપવનૈઃ
સુશોભિતમનન્તાનન્દવિભૂતિદિવ્યતેજઃપર્વતસમષ્ટ્યાકરં
સ્વાત્માનન્દાનુભવવિજ્ઞાનઘનરુદ્રાક્ષકલ્પતરુવનરૈતિમઙ્ગલમનન્તાનન્દ-
ચિત્સાગરમથનોદ્ભૂતરસપ્રવાહૈરલઙ્કૃતમદ્વિતીયં
સ્વયમ્પ્રકાશમનિશં
બ્રહ્માનન્દામૃતરસામ્ભોનિધિતરઙ્ગિણ્યાઃ પ્રવાહૈરતિમઙ્ગલં
નિરુપમનિરવદ્યનિત્યશુદ્ધબુદ્ધનિરતિશયતેજોરાશિ-
વિશેષાનન્તાનન્દવિમાનજાલાવલિભિઃ
મમાકુલં ક્રીડાનન્તમણ્ટપવિશેષૈર્વિશેષિતં
બોધાનન્દમયાનન્તદિવ્યતેજોરાશિવિશેષચૈતન્યપ્રાસાદૈઃ
પરિવેષ્ટિતમનન્તપરમાનન્દામૃતરસાબ્ધિકલ્લોલતરઙ્ગાવલિભિ-
ર્દિવ્યતેજોમયછત્રચામરધ્વજપતાકાવિતાનતોરણાદિભિરલઙ્કૃતં
પરમાનન્દવ્યૂહૈર્નિત્યમુક્તૈરભિતસ્તતં
તચ્ચાનન્તબ્રહ્મતેજોમયબિલ્વકલ્પતરુવનૈરાકુલં
વેદાન્તસારભૂતસિદ્ધાન્તાનન્તસ્કન્ધૈર્વિરાજિતં
મહાવાક્યાર્થસ્વરૂપાનન્તશાખાસમન્વિતં
સચ્ચિદાનન્દસ્વરૂપાનન્તાનન્દપત્રૈસ્સુમઙ્ગલમદ્વિતીયાત્મચૈતન્યવુન્તૈઃ
સુસંલગ્નં વિજ્ઞાનઘનમાનન્દામૃતકલ્લોલાનન્તપુષ્પૈરલઙ્કૃત-
મખણ્ડાનન્દાહ્લાદાનન્તપ્રવાહદિવ્યસુગન્ધૈઃ

સમાકુલં નિરતિશયાનન્દામૃતસારસાગરાનન્તમકરન્દાકારં
નિશ્શઙ્કાનન્દમોક્ષસામ્રાજ્યચિન્તામણિફલાનન્તૈર્વિરાજિતં
વાચામગોચરમનોન્મનાનન્દામ્બુધિદિવ્યતેજોમયજ્વાલાજાલદીપિતાત્યન્તોન્નતાનન્ત-
શિખરાકારં શિવાલયં શિવાનન્દમયદિ૦યનાનાલીલાવિગ્રહવિલાસ-
વિલસિતાનન્દાવિર્ભાવચરિત્રચિત્રીકૃતચિત્રૈરલઙ્કૃતં
મૂર્તિમદ્ભિઃ શિવધર્માનન્તોન્નતગોપુરદ્વારાકારૈરસઙ્ખ્યૈરાવૃતં
શિવધર્માનનમૂર્તિવૃષભાવલિભિઃ સુમઙ્ગલં
શિવવિજ્ઞાનાનન્દસાગરતીર્થાકારં પુરતઃસ્થિતાનન્તદિવ્યતીર્થાનાં
નિજમન્દિરં વિજ્ઞાનાનન્દઘનસ્વરૂપાનન્તસોપાનમણ્ડલમાલયમધ્યગતં
સ્વાત્મજ્યોતિર્મયચિદ્રૂપવેદિકાસ્થાનવિશેષં તદુપરિ
ચૈતન્યશક્ત્યાલઙ્કૃતસ્વાત્મચૈતન્યકૈલાસેશ્વરલિઙ્ગાકારં સુપૂજિતં
તત્સન્નિધૌ શિવવિજ્ઞાનાનન્દઘનશૈવધર્મમૂર્તિમાસાદ્ય
વૃષભાકૃતિવિરાજિતં
શિવાનન્દનન્દિસેનબાણરાવણાદ્યનન્તનાનામયાનન્તાનન્દમૂર્તિમાસાદ્ય
ગણેશકુમારનન્દિભૃઙ્ગિચણ્ડિરિટિકીર્તિમુખવીરભદ્રભૈરવ-
મહાકાલશોભનન્દિસુનન્દનન્દિસેનબાણરાવણાદ્યનન્તનાનાગપ-
રૂપમાસાદ્યાનન્તગણમેવિતશિવાલયસ્ય
સમન્તાત્ સ્વસ્વસ્થાને સુશોભિતં બોધાનન્દમયૈરનન્તનિત્યમુક્તૈઃ
પરિસેવિતં શુદ્ધબોધપરમાનન્દાકારવનં
સન્તતામૃતપુષ્પવૃષ્ટિભિઃ પરિવેષ્ટિતં
પરમાનન્દપ્રવાહૈરભિવ્યાપ્તં મૂર્તિમદ્ભિઃ પરમમઙ્ગલૈઃ
પરમકૌતુકાપરિચ્છિન્નાનન્દસાગરાકારં ક્રીડાનન્દપર્વતૈરભિશોભિતં
વાચામગોચરાનન્દબ્રહ્મતેજોરાશિમણ્ડલમખણ્ડતેજોમણ્ડલવિશેષં
દિવ્યનાનામઙ્ગલવાદ્યૈરલઙ્કૃતં પ્રણવાત્મકધ્વન્યાકારં
વિજ્ઞાનઘનસ્વરૂપમનન્તચિદાદિત્યસમષ્ટ્યાકારં શિવાદ્વૈતોપાસકા
ભજન્તે ॥

ઇતિ ષષ્ઠાવરણમ્ ।

(શૈવ-ઉપનિષદઃ)

ઇતિ સિદ્ધાન્તસારોપનિષત્ સમાપ્ત ।

Proofread by Kasturi navya sahiti

*Siddhantasara Upanishad*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*